येयुः इति साम्प्रदायिकाः ॥ एतेषां काशी एव प्रधानतमं वासस्थानम् ॥ * ॥ महादेवः । यथा, महाभारते । १३ । १७ । १२६ ।
"मुण्डो विरूपो विकृतो दण्डी कुण्डी विकुर्व्वणः ॥"
योगाचार्य्यविशेषः । यथा, शिवपुराणे वायुसंहितायाम् । उत्तरभागे । १० । ५ ।
श्रीकृष्ण उवाच ।
"युगावर्त्तेषु सर्व्वेषु योगाचार्य्यच्छलेन तु ।
अवताराणि शर्व्वस्य शिष्यांश्च भगवन् ! वद ॥"
उपमन्युरुवाच ।
"महाकालश्च शूली च दण्डी मुण्डी स एव च ॥"
धृतराष्ट्रपुत्त्राणामेकतमः । यथा, महाभारते धृतराष्ट्रपुत्त्रनामकथने । १ । ६७ । १०२ ।
"निषङ्गी कवची दण्डी दण्डधारो धनुर्ग्रहः ॥"
दण्डीत्यत्र पाशीति केचित् ॥) दण्डयुक्ते त्रि । इति हेमचन्द्रः । ३ । ३८५ ॥ (यथा, महाभारते । १३ । १४ । ३७४ ।
"दण्डी मुण्डी कुशी चीरी घृताक्तो मेखलीकृतः ॥")

दण्डोत्पलं, क्ली, (दण्डयुक्तमुत्पलमिव ।) वृक्षविशेषः । डानिमोला इति डानकुनि इति च भाषा । अस्य गुणाः । क्षयश्वासकासनाशित्वम् । अग्निदीपनत्वञ्च । इति राजवल्लभः ॥ तत्तु पीतरक्तश्वेतपुष्पभेदेन त्रिविधम् । पीतस्य पर्य्यायः । गोवन्दनी २ गन्धवल्ली ३ सहदेवी ४ सहा ५ । रक्तस्य पर्य्यायः । विश्वदेवा १ । श्वेतस्य । दण्डोत्पला १ । इति रत्नमाला ॥

दण्डोत्पला, स्त्री, (दण्डोत्पल + टाप् ।) श्वेतपुष्पदण्डोत्पलम् । इति रत्नमाला ॥

दण्ड्यः, त्रि, (दण्ड्यते इति । दण्ड + कर्म्मणि ण्यत् । यद्वा, दण्डमर्हतीति । दण्ड + "दण्डादिभ्यो यत् ।" ५ । १ । ६६ । इति यत् ।) दण्डनीयः । दण्डितव्यः । (यथा, मार्कण्डेये । २८ । ३४ ।
"यश्चोल्लङ्घ्य स्वकं धर्म्मं स्ववर्णाश्रमसंश्रितम् ।
नरोऽन्यथा प्रवर्त्तेत स दण्ड्यो भूभृतो भवेत् ॥")
तत्पर्य्यायः । दण्डार्हः २ । इति जटाधरः ॥ (यथा, रघुः । १ । २५ ।
"स्थित्यै दण्डयतो दण्ड्यान् परिणेतुः प्रसूतये ॥")

दत्, पुं, दन्तः । इति शब्दचन्द्रिका । अस्य बहुवचने दतः ॥

दत्तं, त्रि, (दीयते इति । दा + क्तः ।) रचितम् । कृतदानम् । तत्पर्य्यायः । विहृतम् २ । इति त्रिकाण्डशेषः ॥ विश्राणितम् ३ । इति शब्दरत्नावली ॥ (यथा, माघे । १ । १५ ।
"स्वहस्तदत्ते मुनिमासने मुनि-
श्चिरन्तनस्तावदभिन्यवीविशत् ॥"
दा + भावे क्तः ।) दाने, क्ली । तत् सप्तविधं यथा,—
"दत्तं सप्तविधं प्रोक्तमदत्तं षोडशात्मकम् ।
पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात् प्रत्युपकारतः ।
स्त्रीशुल्कानुग्रहार्थञ्च दत्तं दानविदो विदुः ॥
अदत्तन्तु भयक्रोधशोकावेशरुगान्वितैः ।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः ॥
बालमूढ़ास्वतन्त्रार्त्तमत्तोन्मत्तापवर्ज्जितम् ।
कर्त्ता ममेदं कर्म्मेति प्रतिलाभेच्छया च यत् ॥
अपात्रे पात्रमित्युक्ते कार्य्ये चाधर्म्मसंहिते ।
यद्दत्तं स्यादविज्ञानात् तददत्तमिति स्मृतम् ॥"
इति मिताक्षरा ॥

दत्तः, पुं, राजर्षिविशेषः । स अग्निसिंहनन्दनः । इति हेमचन्द्रः । ३ । ३६० ॥ (स तु जैनविशेषः । अपरः क्षत्त्रियवंशोत्पन्नो नृपविशेषः । यथा, महाभारते । १२ । २६६ । १५ ।
"आयुर्मतङ्गो दत्तश्च द्रुपदो मात्स्य एव च ॥"
यदुवंशीयस्य राजाधिदेवस्य पुत्त्रः । यथा, हरिवंशे । ३८ । २ ।
"राजाधिदेवपुत्त्रास्तु जज्ञिरे वीर्य्यवत्तराः ।
दत्तातिदत्तौ बलिनौ शोनाश्वः श्वेतवाहनः ॥")
वैश्यस्योपाधिविशेषः । यथा,—
"शर्म्मा देवश्च विप्रस्य वर्म्मा त्राता च भूभुजः ।
भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत् ॥"
इत्युद्वाहतत्त्वम् ॥
अधुना कायस्थादेरुपाधिश्च । (यथा, कुलदीपिकायाम् ।
"गौड़ेऽष्टौ कीर्त्तिमन्तश्चिरवसतिकृता मौलिका ये हि सिद्धा
स्ते दत्ताः सेनदासाः करगुहसहिताः पालिताः सिंहदेवाः ॥")
भगवदवतारविशेषः । स अत्रिपुत्त्रः दत्तात्रेय इति नाम्ना ख्यातः । इति श्रीभागवतम् ॥ (पुत्त्रविशेषः । यथा, देवीभागवते । १ । ६ । ४८ ।
"कुण्डः सहोढ़ः कानीनः क्रीतः प्राप्तस्तथा वने ।
दत्तः केनापि चाशक्तौ धनग्राहिसुताः स्मृताः ॥"
तथा, महाभारते । १ । १२० । ३४ ।
"दत्तः क्रीत उपक्रीत उपगच्छेत् स्वयञ्च यः ॥")

दत्तकः, पुं, (दत्त एव । स्वार्थे कन् ।) द्वादशविधपुत्त्रान्तर्गतपुत्त्रविशेषः । सपिण्डदत्तकस्य अशौचव्यवस्था । यथा, "सपिण्डस्य पुत्त्रीकरणे तु सपिण्डमरणादिनिमित्तं दत्तकस्य तन्मरणादिनिमित्तं सपिण्डानां दशरात्रमेव निर्व्विवादम् । इति अनन्तभट्टकृतदत्तकदीधितिः ॥ * ॥ औरसपुत्त्रेण सह तस्य समभागित्वम् । यथा,—
"दत्तपुत्त्रे यथाजाते कदाचित्त्वौरसो भवेत् ।
पितुर्व्वित्तस्य सर्व्वस्य भवेतां समभागिनौ ॥
इत्यपि वचनं शूद्रविषयम् ।" इति दत्तकचन्द्रिका ॥ अन्यत् पोष्यपुत्त्रशब्दे द्रष्टव्यम् ॥

दत्तकपुत्त्रः, पुं, (दत्तक एव पुत्त्रः ।) द्वादशविधपुत्त्रान्तर्गतपुत्त्रविशेषः । यथा, याज्ञवल्क्ये ।
"दद्यान्माता पिता वा यं स पुत्त्रो दत्तको भवेत् ॥"
तत्परिग्रहणस्य प्रकारो यथा,—
"शुक्रशोणितसम्भवः पुत्त्रो मातापितृनिमित्तकः ।
तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभवतः ॥
नत्वेकं पुत्त्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्व्वेषाम् ।
स्त्री पुत्त्रं न दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्त्तुः ॥
पुत्त्रं प्रतिग्रहीष्यन् बन्धूनाहूय राजनि निवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा प्रतिगृह्णीयादिति ।" इति वशिष्ठः ॥ तस्य गोत्त्रधनप्राप्तिर्यथा,—
"गोत्त्ररिक्थे जनयितुर्न हरेद्दत्त्रिमः सुतः ।
गोत्त्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥
पितुर्गोत्त्रेण यः पुत्त्रः संस्कृतः पृथिवीपते ! ।
आचूड़ान्तं न पुत्त्रः स पुत्त्रतां याति चान्यतः ॥
चूड़ाद्या यदि संस्काराः निजगोत्त्रेण वै कृताः ।
दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ॥
ऊर्द्ध्वन्तु पञ्चमाद्वर्षान्न दत्ताद्याः सुता नृप ! ।
गृहीत्वा पञ्चवर्षीयपुत्त्रेष्टिं प्रथमञ्चरेत् ॥"
इत्युद्वाहतत्त्वम् ॥
दत्तको द्विविधः । केवलदत्तकः द्व्यामुष्यायणदत्तकश्च । केवलदत्तको जनकेन प्रतिग्रहीत्रर्थमेव दत्तः तस्यैव पुत्त्रः । द्व्यामुष्यायणस्तु जनकप्रतिग्रहीतृभ्यामावयोरयमिति संप्रतिपन्नः स उभयोरपि पुत्त्रः ।" इति मिताक्षरा ॥

दत्ताप्रदानिकं, क्ली, (दत्तस्य अप्रदानं ग्रहणमस्त्यस्य । दत्ताप्रदान + ठन् ।) अष्टादशविवादपदान्तर्गतविवादपदविशेषः । दत्तस्य पुनराहरणं यस्मिन् विवादपदे तत् । यथा, नारदः ।
"दत्त्वा द्रव्यमसम्यग् यः पुनरादातुमिच्छति ।
दत्ताप्रदानिकं नाम व्यवहारपदं हि तत् ॥"
"असम्यगविहितमार्गेण ।" इति मिताक्षरा ॥

दत्तात्मा, [न्] पुं, (दत्तः आत्मा येन ।) पुत्त्रविशेषः । यथा,—
"दत्तात्मा तु स्वयं दत्तः ।" इति कात्यायनः ॥ अस्य विवरणम् । "दत्तात्मा तु पुत्त्रो यो मातापितृविहीनस्ताभ्यां त्यक्तो वा तवाहं पुत्त्रो भवामीति स्वयं दत्तत्वमुपगतः ।" इति मिताक्षरा । २ । १३४ ॥ (विश्वदेवानामन्यतमः । यथा, महाभारते । १३ । ६२ । ३४ ।
"सोमपः सूर्य्यसावित्रो दत्तात्मा पुण्डरीयकः ॥")

दत्तानपकर्म्म, [न्] क्ली, (दत्तस्य अनपकर्म्म आदानं यत्र ।) दत्ताप्रदानिकम् । इति मनुः ॥

दत्तिः, स्त्री, (दा + भावे क्तिन् ।) दानम् । इति शब्दरत्नावली ॥ (यथा, रघुः । ८ । ८६ ।
"अपशोकमनाः कुटुम्बिनी-
मनुगृह्णीष्व निवापदत्तिभिः ॥")

दत्तेयः, पुं, (दत्ताया अपत्यं पुमान् । दत्ता + ढक् ।) इन्द्रः । इति त्रिकाण्डशेषः ॥

दद, ङ दाने । धृतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ङ, ददते । इति दुर्गादासः ॥

ददनं, क्ली, (दद + भावे ल्युट् ।) दानम् । इति शब्दरत्नावली ॥

दद्रुः, पुं, कच्छपः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (ददाति कण्डूमिति । दद + बाहुलकात् रुः । यद्वा, दरिद्राति दुर्गच्छत्यनेनेति । दरिद्रा + मृगय्वादित्वात् कुप्रत्ययेन साधुः । इत्युज्ज्वलदत्तः । १ । ६२ ।) रोगविशेषः । दाद